# AMRITA VIDYALAYAM
## HALF YEARLY EXAMINATION 2018 - '19

**Class : VII** **Marks : 80**
**Time : 2½ hrs**

# संस्कृतम्

निर्देशाः
अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
खण्डः क - अपठित अवबोधनम् - 5
खण्डः ख - रचनात्मक कार्यम् - 15
खण्डः ग - अनुप्रयुक्त व्याकरणम् - 25
खण्डः घ - पठित अवबोधनम् - 35

## खण्डः क (अपठित अवबोधनम्)

**1. अधोलिखित अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत।**

एकदा बालः सिद्धार्थः प्रातः भ्रमणाय उपवनम् अगच्छत्। उपवने पक्षिणः मधुरं कूजन्ति स्म। तेषां कलरवं श्रुत्वा सिद्धार्थः प्रसन्नः अभवत्। किञ्चित् कालानन्तरं तस्य भ्राता देवदत्तः अपि आखेटनाय तत्र आगच्छत्। सः बाणेन आकाशे एकं हंसम् अविध्यत्। बाणेन विद्धः हंसः भूमौ अपतत्। सिद्धार्थः करुणया तं हंसं कुटीरम् आनीय हंसस्य परिचर्याम् अकरोत्। सिद्धार्थस्य देवदत्तस्य च मध्ये विवादः भवति यत् हंसः कस्य? अन्ते नृपः निर्णयम् अकरोत् यत् हंसः सिद्धार्थस्य एव। सत्यमेव कथ्यते - "रक्षकः भक्षकात् श्रेष्ठः" इति।

**I. एकपदेन उत्तरत।** **1**

क. 'हंसः कस्य' इति निर्णयः कस्य आसीत्?

ख. उपवने के मधुरं कूजयन्ति स्म?

**II. पूर्णवाक्येन उत्तरत।** **2**

क. सिद्धार्थः भ्रमणाय उपवनं कदा अगच्छत्?

ख. हंस कुत्र अपतत्?

**III. प्रदत्त विकल्पेभ्यः उचितं उत्तरं चित्वा लिखत।** **2**

क. गद्यांशे 'अकरोत्' क्रियापदस्य कर्तृपदम् किम्?
(हंसः, सिद्धार्थः, देवदत्तः, भक्षकः)

ख. "किञ्चित् कालानन्तरं तस्य भ्राता" - इति वाक्ये 'तस्य' इति सर्वनाम शब्दं कस्मै प्रयुक्तम्?
(नृपाय, कुटीराय, हंसाय, सिद्धार्थाय)

ग. गद्यांशे 'नृपः' इति कर्तृपदस्य किं क्रियापदं प्रयुक्तम्?
(अकरोत्, अविध्यत्, अभवत्, अगच्छत्)

घ. अनुच्छेदे 'सेवाम्' इति अर्थे किं पदं प्रयुक्तम्?
(परिचर्याम्, निर्णयम्, सत्यम्, मधुरम्)

## खण्डः ख (रचनात्मक कार्यम्)

**2. भवान् प्रणवः स्वमित्रं पत्रं लिखति। अधोलिखित पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा पत्रं पुनः लिखत।** **5**

(पत्रम्, दिल्लीतः, उत्साहवर्धनम्, नमोनमः, क्रीडासमारोहे, अभिन्नम्, प्रणवः, नाटकस्य, भविष्यति, आयोजनम्)

पत्रम्

शालीमार बागः
1. ------------
तिथिः ----------

प्रियमित्र गोविन्द!
सस्नेहं 2. ---------

अत्र कुशलं तत्रास्तु। त्वया लिखितं 3. ---------- प्राप्तम्। एतत् ज्ञात्वा अहम् अतीव प्रसन्नः यत् त्वया वार्षिक 4. --------- प्रथमं पारितोषिकं प्राप्तम्। अस्माकं विद्यालये अपि संस्कृतदिवसस्य 5. ---------- भविष्यति। अस्मिन् वर्षे 'अभिज्ञानशाकुन्तलम्' इति 6. -------- मञ्चनं 7. ---------। विद्यालये तव उपस्थित्या मम 8. ------- अपि भविष्यति। अतः अवश्यम् आगच्छ। पत्रोत्तरस्य प्रतीक्षायाम्।

तव 9. ------ मित्रम्
10. --------

**3. मञ्जूषायां प्रदत्तशब्दानां साहाय्येन पञ्च संस्कृतवाक्यानि लिखत।** **10**

उपवनम्

(चित्रशलभाः, वृक्षाः, फलानि, लताः, दृश्यन्ते, खगाः, पुष्पाणि, बालिका-बालकाः, शोभन्ते, जनाः, संलपन्ति, क्रीडन्ति)

अथवा

**अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्त शब्दानां साहाय्येन पञ्च वाक्यानि लिखत।**

मञ्जूषा

(वर्षाकालः क्षेत्रेषु, नदीषु, जनाः, गृहाणि, जलप्लावेन, मार्गाः, दुरितपूर्णाः, स्तम्भनम्,

दृष्टुं न शक्यन्ते, जन्तवः)



## खण्डः ग – (अनुप्रयुक्त व्याकरणम्)

**4. अधोलिखित वाक्येषु रेखाङ्कित पदेषु सन्धिं/सन्धिच्छेदं वा कृत्वा लिखत। 4**

क. अहं भवतां सत्कारेण सन्तुष्टः + अस्मि।

ख. हंहो! महत् + आश्चर्यम्।

ग. वायुश्च सत्येन वाति।

घ. तदनन्तरं सा स्वभ्रात्रा सह पद्भ्यां समग्रंभारतं अभ्रमत्।

**5. अधोलिखित वाक्येषु रेखाङ्कित पदानां विभक्ति वचनं च विकल्पेभ्यः चिनुत। 4**

क. चत्वारः बालकवयः मञ्चस्य उपरि उपविष्टाः।
(षष्ठी, प्रथमा, द्वितीया)

ख. रमा अपि मातुः सकाशात् संस्कृतभाषां प्राप्तवती।
(प्रथमा, द्वितीया, तृतीया)

ग. मित्र! ममापि अष्टौ कर्मकराः सन्ति।
(प्रथमा, तृतीया, द्वितीया)

घ. कच्छपः गृहं गत्वा अचिन्तयत्।
(पञ्चमी, द्वितीया, प्रथमा)

**6. रेखाङ्कित पदानां प्रकृति-प्रत्ययौ संयोज्य / विभज्य उचितमुत्तरं विकल्पेभ्यः चित्वा लिखत। 4**

क. आकाशमार्गेण अन्यत्र गन्तुम् इच्छामि।
(गम् + तुमुन्, गम् + तु, गम् + तुं)

ख. विस्मयो नहि कर्तव्यो बहुरत्ना वसुन्धरा।
(कृ + क्त्वा, कृ + तव्यत्, कृ + व्यो)

ग. अहं कार्याणि स्वयमेव कृ + तुमुन् इच्छामि।
(कर्तुं, करणीयं, कृता)

घ. स: रूढिबद्धां धारणां परित्यज्य स्वपत्नीं संस्कृतभाषां अध्यापयत्।
(परि + त्यज् + ल्यप्, परि + ज् + ल्यप्, परित्य + ज्य)

**7. निम्नलिखित संवादं मञ्जूषायां प्रदत्त शब्दैः पूरयित्वा पुनलिखत। 3**

(सार्ध-अष्टवादने, पादोन अष्ट, षड्वादने)

सीता - भद्रे त्वं कदा व्यायामं करोषि?

भद्रा - सीते! अहं प्रात: 1. ---------- वादने व्यायामं करोमि।

सीता - भद्रे! त्व पिता अपि व्यायामं करोति?

भद्रा - सीते! आम् मम पिता अपि व्यायामं करोति।

सीता - भद्रे! तव माता कदा देवालयं गच्छति?

भद्रा - मम माता प्रात: पञ्चवादने एव देवालयं गच्छति 2. ---- आगमिष्यति च।

सीता - प्रात: कार्यादिकं कृत्वा कदा विद्यालयं गच्छसि?

भद्रा - मातु: आगमनानन्तरं 3. ---------- वादने अहं विद्यालयं गमिष्यामि।

**8. उचित संख्या शब्दैः वाक्यानि पूरयत। 2**

अस्माकं कक्षायां (20) --------- बालिका: (23) --------- बालका: पठन्ति। सर्वे छात्रा: आहत्य (43) -------- परीक्षणशालां उपयुज्यन्ते। अत: छात्राणां मध्ये परस्पर धारणां, बहुमानं च वर्धन्ते। परीक्षणशालासु आहत्य (30) --------- आसनानि सन्ति।

**9. अधोलिखित वाक्येषु रिक्तस्थानानि उचितैः अव्ययपदैः पूरयित्वा लिखत। 4**

(अन्त:, उपरि, बहि:, अलं)

क. ----------- विवादेन।

ख. छात्रा: विद्यालयस्य ------- प्रविशन्ति।

ग. वृक्षस्य --------- खगा: वसन्ति।

घ. मालाकारा: उद्यानात् ---------- आगच्छत्।

**10. अधोलिखित वाक्येषु रेखाङ्कित पदं अशुद्धं अस्ति। अशुद्धम् पदं संशोध्य पुनः लिखत। 4**

क. मम भवने पञ्च उन्नत: दीप: सन्ति।

ख. दीपप्रभावेन दश: भिन्निचित्राणि दृश्यन्ते।

ग. मम हस्ते एकं फलं, पञ्च पुष्पाणि एका स्यूता च भवति।

घ. वर्षाकाले गृहस्य बहि: मा गच्छ।

## खण्डः घ (पठितावबोधनम्)

**11. अधोलिखित गद्यांशं, श्लोकं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

**अ. गद्यांशः**

अथ एकदा धीवरा: तत्र आगच्छन्। ते अकथयन् "वयं श्वं: मत्स्यकूर्मादीन् मारयिष्याम:"। एतत् श्रुत्वा कूर्म: अवदत् "मित्रे! किं युवाभ्यां धीवराणां वार्ता श्रुता?

अधुना किम् अहं करोमि?" हंसौ अवदताम् - "प्रातः यत् उचितं तत् कर्तव्यम्" कूर्मः अवदत् - "मैवम्। तद् यथाऽहम् अन्यं ह्रदं गच्छामि तथा कुरुतम्"। हंसौ अवदतम् "आवां किं करवाव?" कूर्मः अवदत् - अहं युवाभ्यां सह आकाशमार्गेण अन्यत्र गन्तुमिच्छामि"।

**I. एकपदेन उत्तरत।** **3**

क. के तत्र आगच्छन्?

ख. कूर्मः कथम् अन्यत्र गन्तुं इच्छति?

ग. 'वयं इवः मत्स्यकूर्मादीन् मारयिष्यामः' इति के अकथयन्?

**II. पूर्णवाक्येन उत्तरत।** **4**

क. धीवराणां मतं किमासीत्?

ख. कूर्मः किम् अवदत्?

**III. प्रदत्त विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।** **2**

क. मैवम् तद् यथाऽहम् अन्यं ह्रदं गच्छामि अस्मिन् वाक्ये 'ह्रदं' इत्यस्य विशेषणं किम्?
(यद्, मैवं, यथा, अन्यम्)

ख. श्वः मत्स्य कूर्मादीन् मारयिष्यामः - अस्मिन् वाक्ये कर्तृपदं किम्?
(मत्स्यः, वयं, यूयं, श्वः)

ग. 'अद्य' इत्यस्य विलोमपदः कः?
(मत्स्यः, कूर्मः, श्वः)

घ. आवां किं करवाव - अस्मिन् वाक्ये 'आवां' इति पदं काभ्यां प्रयुक्तम्?
(धीवराभ्याम्, हंसाभ्याम्, कूर्मस्य, युवाभ्यां)

**आ. श्लोकांशः**

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥

**I. एकपदेन उत्तरत।** **2**

क. पृथिव्यां कति रत्नानि भवन्ति?

ख. रत्नानि कुत्र लभ्यते?

**II. पूर्णवाक्येन उत्तरत।** **4**

क. कैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते?

ख. पाषाणखण्डेषु का विधीयते?

**III. प्रदत्त विकल्पेभ्यः उचितं उत्तरं चित्वा लिखत।** **2**

क. श्लोके 'भूमि' इत्यर्थे किं पदं प्रयुक्तम्?
(मूढः, पाषाणः, पृथिवी)

ख. रत्नसंज्ञा विधीयते। कैः विधीयते?
(पण्डितैः, नरैः, मूढैः)

ग. विधीयते - लकारः कः?
(लृट्, लट्, लङ्, लिङ्)

घ. त्रीणि रत्नानि - अस्य लिङ्गम्, वचनं च के?
(नपुंसक-एक, नपुंसक-बहु, नपुंसक-द्वि)

**इ. नाट्यांशः**

चार्वाकः - आम्, आम्। शरीरस्य पोषणं
सर्वथा उचितमेव। यदि धनं नास्ति
तदा ऋणं कृत्वापि पौष्टिकः पदार्थः
एव भोक्तव्यः। तथा कथयति
चार्वाककविः -
यावज्जीवेत् सुखं जीवेद्
ऋणं कृत्वा धृतम् पिबेत्।

श्रोतारः - तर्हि ऋणस्य प्रत्यर्पणं कथम्?

चार्वाकः - श्रूयतां मम अवशिष्टं काव्यम् -
घृतं पीत्वा श्रमं कृत्वा
ऋणं प्रत्यर्पयेत् जनः ॥
(काव्यपाठश्रवणेन उत्प्रेरितः एकः बालकोऽपि आशुकवितां रचयति,
हासपूर्वकं च श्रावयति)

**I. एकपदेन उत्तरत। 2**

क. कस्य पोषणं सर्वथा उचितं भवति?

ख. कः श्लोकं कथयति?

**II. पूर्णवाक्येन उत्तरत। 2**

किं कृत्वा जनं ऋणं प्रत्यर्पयेत्?

**III. प्रदत्त विकल्पेभ्यः उचितं उत्तरं चित्वा लिखत। 2**

क. 'पौष्टिकः पदार्थः' - अस्मिन् विशेषणपदं किम्?
(पदार्थः, पोष्टिकः, भोक्तव्यः)

ख. 'अनुचितं' - इति पदस्य विलोमपदम् अस्मात् भागात् चिनुत।
(अवशिष्ट, हासपूर्वकं, उचितम्)

ग. बालकोऽपि - पदच्छेदः कः?
(बालकः + ओपि, बालकः + अपि, बालको + पि)

घ. 'ऋजुता' - अर्थः कः?
(समता, सौम्यता, सरलता)

**12. रेखाङ्कित पदानि आधृत्य प्रश्ननिर्माणं कुरुत। 4**

क. इंग्लैण्डदेशात् रमाबाई <u>अमरीकादेशम्</u> अगच्छत्।

ख. एतदर्थं सः <u>समाजस्य</u> प्रतारणाम् अपि असहत।

ग. रमा तनयया मनोरमया सह जन्मभूमिं प्रत्यागच्छत्।

घ. पण्डिता रमाबाई 1858 तमे ख्रिष्टब्दे जन्म अलभत।

**13. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित श्लोकद्वयस्य अन्वयं पूरयत। 4**

मञ्जूषा

(आचारः, कौटिल्यं, देशे, औदार्यं, पारम्पर्य, न, उच्यते, तथा)

क. यस्मिन् देशे य आचारः पारम्पर्यक्रमागतः।
वर्णानां सान्तरालानां स सदाचार उच्यते ॥

अन्वयः - यस्मिन् 1. -------- वर्णानां सान्तरालानां 2. ------ क्रमागताः य 3. -------- सः सदाचार 4. -------।

ख. सर्वदा व्यवहारे स्यात् औदार्यं सत्यता तथा।
ऋजुता मृदुता चापि कौटिल्यं न कदाचन ॥

अन्वयः - व्यवहारे यथा 1. ------- सत्यता 2. -------- ऋजुता मृदुता च अपि (स्यात्) 3. ------- कदाचन 4. --------- स्यात्।

**14. अधोलिखित कथनानां समुचितं भावं विकल्पेभ्यः चित्वा लिखत। 4**

क. अत्र अधुना अपि निराश्रिताः स्त्रियः जीवनं यापयन्ति।
(आश्रयसहिताः, आश्रयरहितः, दुःखिताः)

ख. प्रियं च अनृतं ब्रूयात् एष धर्मः सनातनः।
(सत्यम्, कठिनम्, असत्यम्)

3. ममापि अष्टौ कर्मकराः सन्ति।
(सेवकाः, यजमानाः, धनिकाः)

4. कूर्मः दण्डात् भूमौ पतितः।
(मीनः, शुकः, कच्छपः)